# वैयाकरणसिद्धान्तकौमुदी

## हल्सन्धिप्रकरणम् (२)

# ११२. शात् (८.४.४४)

- एकपदात्मकम् ।
- 'स्तोः श्चुना श्चुः' (८.४.४०) इत्यतः श्चुः इति, 'न पदान्ताट्टोरनाम्' (८.४.४२) इत्यतः 'न' इति, 'तोः षि' (८.४.४३) इत्यतः 'तोः' इति च अनुवर्तते ।
- शात् – पञ्चमी = शकारात् परस्य
- तोः – षष्ठी = तवर्गस्य
- श्चुः – प्रथमा = श्चुत्वं
- न = न भवति
- शात् परस्य तवर्गस्य चुत्वं न स्यात् ।

- विश् + नः = विश्नः ('विश्ञः' इति न भवति)
- प्रश् + नः = प्रश्नः

# ११३. ष्टुना ष्टुः (८.४.४१)

- पदद्वयम् । 'स्तोः' इति अनुवर्तते ।
- स्तोः – षष्ठी = सकार-तवर्गयोः
- ष्टुना – तृतीया = षकार-टवर्गाभ्यां योगे
- ष्टुः – प्रथमा = षकार-टवर्गौ स्तः
- स्तोः ष्टुना योगे ष्टुः स्यात् ।

- अत्रापि स्थान्यादेशयोः यथासंख्यमाश्रीयते ।
- स् – ष्
- त् – ट्
- थ् – ठ्
- द् – ड्
- ध् – ढ्
- न् – ण्

- रामस् + षष्ठः = रामष् षष्ठः
- रामस् + टीकते = रामष्टीकते
- पेष् + ता = पेष्टा
- तत् + टीका = तट्टीका
- चक्रिन् + ढौकसे = चक्रिण्ढौकसे

# ११४. न पदान्ताट्टोरनाम् (८.४.४२)

- चत्वारि पदानि । न, पदान्तात्, टोः, अनाम् ।
- 'स्तोः श्चुना श्चुः' इत्यतः 'स्तोः' इति, 'ष्टुना ष्टुः' इत्यतः 'ष्टुः' इति च अनुवर्तते ।
- पदान्तात् टोः – पञ्चमी = पदान्तात् टवर्गात् परस्य
- स्तोः – षष्ठी = सकारस्य तवर्गस्य च
- ष्टुः – प्रथमा = ष्टुत्वं
- न
- अनाम् = नाम्=वर्जम्
- पदान्तात् टवर्गात् परस्य अनामः स्तोः ष्टुः न स्यात् ।

- षट् + सन्तः = षट् सन्तः
- षट् + ते = षट् ते

- पदान्तात् किम्?
- ईट् + ते ('ईड स्तुतौ' धातुः, आत्मनेपदे लटि प्रथमपुरुषैकवचनम् )
- ईट् टे
- ईट्टे

- टोः किम्?
- पदान्ते षकारः अस्ति चेत् ष्टुत्वं भवत्येव ।
- सर्पिष् + तमम् = सर्पिष्टमम्

# अनाम्-नवति-नगरीणामिति वाच्यम् (वा)

- षष् + नाम्
- षड्  नाम् ('झलां जशोऽन्ते' इति जश्त्वम् – ८.२.३९)
- षड्  णाम् ('ष्टुना ष्टुः' इति ष्टुत्वम् – ८.४.४१)
- षण् णाम् ('प्रत्यये भाषायां नित्यम्' इति अनुनासिकः – ८.४.४५)
- षण्णाम्
- षड् + नवतिः = षण्णवतिः
- षड् + नगर्यः = षण्णगर्यः

# १ १५. तोः षि (८.४.४३)

- पदद्वयम् ।
- 'ष्टुना ष्टुः' इत्यतः 'ष्टुः' इति, 'न पदान्ताट्टोरनाम्' इत्यतः 'न' इति च अनुवर्तते ।
- तोः – षष्ठी = तवर्गस्य
- षि – सप्तमी = षकारे परे
- ष्टुः – प्रथमा = ष्टुत्वम्
- न = न भवति
- तवर्गस्य षकारे परे न ष्टुत्वम् ।
- सन् + षष्ठः = सन् षष्ठः

# ८४. झलां जशोऽन्ते (८.२.३९)

- पदत्रयम् । झलां, जशः, अन्ते । 'पदस्य' (८.१.१६) इत्यधिक्रियते ।
- पदस्य अन्ते = पदान्ते
- झलां – षष्ठी = झल्-वर्णानाम्
- जशः – प्रथमा = जश्-वर्णाः स्युः
- पदान्ते झलां जशः स्युः ।
- वाक् + ईशः = वागीशः
- चित् + रूपम् = चिद्रूपम्

# ११६. यरोऽनुनासिकेऽनुनासिको वा (८.४.४५)

- चत्वारि पदानि । यरः, अनुनासिके, अनुनासिकः, वा ।
- 'न पदान्ताट्टोरनाम्' इत्यतः 'पदान्तात्' इति अनुवर्तते । तच्च षष्ठ्यन्ततया विपरिणम्यते ।
- पदान्तस्य यरः – षष्ठी = पदान्ते विद्यमानस्य यर्-वर्णस्य स्थाने
- अनुनासिके – सप्तमी = अनुनासिके परे
- अनुनासिकः – विधेयः = वर्गस्य पञ्चमो वर्णः आदेशः स्यात्
- वा = विकल्पेन
- यरः पदान्तस्य अनुनासिके परे अनुनासिको वा स्यात् ।

एतत् + मुरारिः

एत द् म् उरारिः

पदान्ते यर् अनुनासिकः

अनुनासिकः (वर्गस्य पञ्चमो वर्णः)

एत न् म् उरारिः

एतन्मुरारिः / एतद् मुरारिः

- चतु र् + म् उखः
- पदान्ते यर् अनुनासिकः
- स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शौ चरितार्थौ विधिरयं रेफे न प्रवर्तते ।
- चतुर्मुखः

# ’प्रत्यये भाषायां नित्यम्’ (वा) ।

- लौकिकप्रयोगे प्रत्ययस्थे अनुनासिके परे नित्यम् अनुनासिकादेशः स्यात् ।
- तत् प्रमाणं यस्य
- तद् + मात्रम् (’प्रमाणे द्वयसच्-दघ्नच्-मात्रचः’ ५.२.३७ – इति मात्रच् प्रत्ययः)
- तन्मात्रम्
- चिन्मयम् (मयट् प्रत्ययः)

- कथं तर्हि 'मदोदग्राः ककुद्मन्तः' इति?
- ककुद् एषाम् अस्ति इत्यर्थे मतुप्-प्रत्ययः ।
- यवादिगणे(गण-२५१) दकारनिपातनात् । ('मादुपधायाश्च मतोर्वोऽयवादिभ्यः'-८.२.९)
- यव दल्मि ऊर्मि भूमि कृमि कुशा वशा ...... ककुद् मरुत् गरुत् इक्षुद्रु मधु

# ११७. तोर्लि (८.४.६०)

- पदद्वयम् । तोः, लि ।
- 'अनुस्वारस्य ययि परसवर्णः' इत्यतः 'परसवर्णः' इत्यनुवर्तते ।
- तोः – षष्ठी = तवर्गस्य स्थाने
- लि – सप्तमी = लकारे परे
- परसवर्णः – प्रथमा = परसवर्णः आदेशः स्यात्
- तवर्गस्य लकारे परे परसवर्णः स्यात् ।

तद् + लयः

| | | | |
|---|---|---|---|
| त | द् | ल् | अयः |
| | तवर्गः | लकारः | |
| त | ल् | ल् | अयः |
| | तल्लयः | | |

- लकारस्य सवर्णौ द्वौ – ल्, लँ् ।
- विद्वान् + लिखति = विद्वाल्ँलिखति ।
- नकारस्य अनुनासिको लकारः ।

# ११८. उदः स्थास्तम्भोः पूर्वस्य (८.४.६१)

- पदत्रयम् ।
- 'अनुस्वारस्य ययि परसवर्णः' इत्यतः सवर्णः इत्यनुवर्तते ।
- उदः – पञ्चमी = उदः परयोः
- स्थास्तम्भोः – षष्ठी = स्थाधातोः स्तम्भधातोश्च स्थाने
- पूर्वस्य सवर्णः – प्रथमा = पूर्वसवर्णः आदेशः स्यात् ।
- उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् ।

- ’आदेः परस्य’ इति परिभाषया स्थास्तम्भोः आदेः सकारस्य पूर्वसवर्णः आदेशः ।
- स्थानी - सकारः । पूर्वसवर्णाश्च पञ्च – त्, थ्, द्, ध्, न् ।
- स्थानम् दन्ताः दन्ताः
- आभ्यन्तरप्रयत्नः विवृतम् स्पृष्टम्
- बाह्यप्रयत्नाः विवारः, श्वासः, घोषः त्, थ् (विवारः, श्वासः, घोषः)
- महाप्राणः थ् (महाप्राणः)
- अत्र अघोषस्य महाप्राणस्य सस्य तादृश एव थकारः ।

उद्   + स्थानम्

उत्     स्थानम् ('खरि च' इति चर्त्वम् – ८.४.५५)

उत्     थ्        थानम् ('उदः स्थास्तम्भोः…' इति पूर्वसवर्णः – ८.४.६१)

उत्     थानम्    ('झरो झरि सवर्णे'  - ८.४.६५ – इति थकारस्य वा लोपः)

१. उत्थानम्

२. उत्थ्थानम् (लोपाभावे)

उद् + स्तम्भनम्

उत् स्तम्भनम् (’खरि च’ इति चर्त्वम् – ८.४.५५)

उत् थ् तम्भनम् (’उदः स्थास्तम्भोः...’ इति पूर्वसवर्णः – ८.४.६१)

उत् तम्भनम् (’झरो झरि सवर्णे’ - ८.४.६५ – इति थकारस्य वा लोपः)

१. उत्तम्भनम्

२. उत्थ्तम्भनम् (लोपाभावे)

लोपाभावपक्षे तु थकारस्यैव श्रवणम् । न तु ’खरि च’ इति चर्त्वम् । चर्त्वं प्रति थकारस्य असिद्धत्वात् ।

# ११९. झयो होऽन्यतरस्याम् (८.४.६२)

- पदत्रयम् । झयः, हः, अन्यतरस्याम् ।
- 'अनुस्वारस्य ययि परसवर्णः' इत्यतः सवर्ण इति, 'उदः स्थास्तम्भोः पूर्वस्य' इत्यतः पूर्वस्येति चानुवर्तते ।
- झयः – पञ्चमी = झयः परस्य
- हः – षष्ठी = हकारस्य
- पूर्वस्य सवर्णः – प्रथमा = पूर्वसवर्णः स्यात्
- अन्यतरस्याम् = विकल्पेन
- झयः परस्य हस्य पूर्वसवर्णो वा स्यात् ।

घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशो वर्गचतुर्थ एव आदेशः ।

वाग् + हरिः = वाग्घरिः / वाग्हरिः ।